राष्ट्रिय संस्कृत संस्थानम्
नवदेहली

गङ्गानाथ झा
केन्द्रीय संस्कृत
विद्यापीठ ग्रन्थमाला

नीतकथावलिका

योऽनूचानः स नो महान्
राष्ट्रियसंस्कृतसंस्थानम्

।। रचयिता ।।
हरिदत्त शर्मा

गैर्वाणीगौरवग्रन्थमाला

गीर्वाणवाणीगौरवभूतप्रत्नूतनलघुग्रन्थानां सङ्कलनम्

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठशोधपत्रिकायाः
परिशिष्टम्

चतुर्थं प्रसूनम्

गीतकन्दलिका

रचयिता

डॉ० हरिदत्त शर्मा

प्रवक्ता, संस्कृत विभाग

इलाहाबाद विश्वविद्यालय, इलाहाबाद

Journal of G. N. Jha Kendriya Sanskrit Vidyapeetha
Vol. XXXVIII No. 1—4

अष्टत्रिंशत्तमे भागे प्रथम-चतुर्थाङ्काः

गैर्वाणीगौरवग्रन्थमाला गंगानाथझा-केन्द्रीय-संस्कृत-विद्यापीठ शोधपत्रिकायाः परिशिष्टरूपेण प्रकाश्यते। अस्यामप्रकाशितानि पुनः-संपादितानि वा विविधग्रन्थ-प्रसूनानि संगृहीतानि भवन्ति। एतानि पुस्तकप्रसूनानि स्वतन्त्रतयापि स्वल्पमूल्येन क्रेतुं शक्यन्ते।

द्वितीय संस्करण 2006

प्रधानसम्पादकः प्रकाशकश्च

डा० गयाचरण त्रिपाठी

प्राचार्यः

गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

प्रयाग-२

मुद्रक : इंडियन ऑफसेट प्रिन्टर्स

136, विवेकानन्द मार्ग, इलाहाबाद फोनः 0532-3092806, 9335112378

Foreword to Second Edition

Gone were the days when Sanskrit poetry used to be composed in pure metres following strictly the metrical rules. That poetry attained eternal value. Even lyrical poetry too in those days was in some kind of metre with raga (राग). Coming down the ages the adherence to metrical rules has disappeared. In spite of this, Lyrical poetry emerged in great abundance.

Such lyrical poetry composed by Prof. Haridatt Sharma, Dept. of Sanskrit, Allahabad in a book form "गीतिकन्दलिका" was published by this Vidyapeetha in 1983. People are fond of lyrical poetry. Hence the book was preferred by one and all. As a result its copies were exhausted in no time resulting in its demand for a reprint. It was long over due.

Now its time is here. We feel it pleasure in producing it to the scholars who will enjoy it because it is lyrical.

Goparaju Rama
Principal

FOREWARD

We feel pleasure in introducing a promising young poet of Sanskrit to the lovers of this language through his maiden attempt *Gītakandalikā*, a collection of Sanskrit lyrics

One of the objectives of this Institute is to foster and promote creative writing in Sanskrit and to make Sanskrit poetry relishable to a wider mass of people by making it simple, lucid and natural. The Institute has organised two *Kavisammelanas* in the past to achieve this aim and has published collections of the poems recited there (*Vāṇīvilasitam*, Pt. I and II). It has also published *Kāvyas* like *Jhānsīśvarīcaritam* and *Kāpiśāyanī*; the former of which has been awarded prize by the Sanskrit Academy of Uttar Predesh whereas the latter has won the coveted Sāhitya Academy award for the year 1981.

The present work is our next attempt in this series. It is a collection of lyrical poems (gītāni) composed in simple, easily intelligible, yet chaste and musical Sanskrit full of literary qualities. A number of gītas collected here have frequently been recited by Dr. Haridatta Sharma to the public in the poetic gatherings of Sanskrit and have won him instantaneous applause and admiration of the Connoisseures. The scope of the poems has a very wide canvas. It varies from the poems written especially for children (खेलनम्, वाष्पयानेन यानम्) to the feelings of a young heart upon coming into contact with his sweetheart (नवयौवननवलसितम्, प्रणय-काकली) and the feelings of sorrow experienced by a lady upon separation from her lover (विरहविधुरागानम्), from the poems imbibed with nationalistic feelings (वयं भारतीयाः, प्रयाणगीतम्) to lamentation upon the present condition of our edu- cational institu-

tions (विद्यामन्दिरदूषणम्), from descriptions of the beauties of nature and seasons (आगता कुतस्त्वम्, वर्षति पानीये) to serious retrospection of the human nature and the world (विषम-विडम्बनम्, विपरिणमनम्) and the setbacks and disappointments felt by him in his life (वेदना न याता). It is the world of a young mind and a young heart of the modern age that confronts us here. The quality common to all poems is their musical character, simplicity of expression and lucidity of style. Many of these poems have been composed and set in the *rāgas* borrowed from folksongs of *Vraja* region from which the poet hails.

Shri Sharma has been given the title of *Kavi-puṃskokila* by one of the members of this Institute. I think that he aptly deserves it and hope that the lovers of Sanskrit poetry shall welcome the publication of these mellifluous poems.

G. N. Jha K. S. Vidyapeetha
Allahabad
10-11-1983

G. C. Tripathi
Principal

आकूतम्

मृदुलरसभावभरितं ललितपदविन्यासविराजितं छान्दससङ्गीतगुम्फितं मधुरमनोहरञ्च वर्तते गीर्वाणवाणीसाहित्यम्। छन्दःशास्त्रनियमनिबद्धेऽस्मिन् साहित्ये विविधानां वार्णिकानां मात्रिकाणाञ्च पद्यानां बाहुल्यं वरीवर्ति, परं नास्ति गीतगोविन्दसदृशानां गीतिमयानां काव्यानामधिकं प्रवर्तनम्; चरणचतुष्टयात्मकपद्यातिरिक्तं नास्ति गीतीनां विशिष्टं प्रचलनम्, यत्कृते नितान्तमनुकूलं नाम संस्कृतम्। अनल्पं विद्यते तत्र गीतितत्त्वम्, परं श्लोकपरिमाणरूपमेव न तु विशिष्टसङ्घटनघटितम्। पुरा स्वल्पसंविकासमापन्नाया अस्या गीतविधायाः पुनरुत्थानं परिदृश्यते वर्तमानसंस्कृतरचनासंसारे। अद्यतनेषु संस्कृतकविसम्मेलनेषु नवनवशैलीलालितानां ललितगीतानां मधुरध्वनिराकर्ण्यते। गीतमेव लयसन्तरणपूर्वकं भावजागरणं कर्तुं समर्थम्, गीतमेव रागात्मकतासममेव भावप्रवणतापादनस्य साधनम्, गीतमेव च लोकहृदयानुरञ्जनस्य समीचीनं विधानम्। अतोऽस्यामेव धारायां प्रौढं हृद्गतानां रागात्मिकवृत्तीनां भावोच्छ्वासानाञ्च व्यञ्जकं गीतिकाव्यमिदम्। सरलतया सरसतया च संस्कृतं लोकप्रियं सर्वसुगमञ्च कर्तुं प्रस्तूयतेऽयमन्यतमः प्रयोगः।

इयं गीतमालिका मदीयकवितायाः शैशवकाल एव संगुम्फिता। विद्यार्जनकाले यथाकथञ्चित् वागृदेवताकृपापरिणामरूपेण केनचित् संस्कारविशेषेण वा यद्

बीजं बालहृदयेऽस्मिन् निक्षिप्तम्, तदेव नवकन्दलरूपेण प्रत्यग्राङ्कुररूपेण वा प्रस्फुटितम्। अतो गीतकन्दलिकेयं मन्दस्य कवियशःप्रार्थिनोऽस्य जनस्य भावबीजाङ्कुर एव, कविशिशोर्दोलादोलनमेव, लीलाचपलबालस्य करचरणचालनमेव।

विद्यार्थिजीवनकालादेव हिन्दीभाषया गीतरचने नवकविताप्रणयने चासीन्मदीया विशिष्टा रुचिः। पुनः संस्कृताध्ययनसमकालमेव संस्कृतभाषयाऽपि विविधशास्त्रीयच्छन्दोमाध्यमेन पद्यरचनायाः प्रयासः कृतः, समस्यापूर्तिषु रुचिर्वर्धिता, पुनश्च शनैः शनैः प्रवृत्ता संस्कृतगीतरचनाप्रवृत्तिः। अस्मिन् पुस्तके प्रायेण शिक्षणजीवनकाले रचितानां गीतानां क्रमिकं सङ्कलनं वर्तते। गीतानीमानि प्रायशो लोकगीतलयमाश्रित्य एव रचितानि। केषुचिद् व्रजभाषाया लोकगीतलयानुसरणं वर्तते, अपरेष्वनेकेषु च कदाचित् निष्प्रयोजनगुञ्जनेन समुद्गतम् आत्मकल्पितरागनिबन्धनमपि च। प्रचलितच्छन्दःपद्धतेः परिहारेऽपि मात्राविनियोजनव्यवस्था तु वरीवर्ति, येन छन्दसि स्वच्छन्दोऽप्यच्छन्दोऽहम्। रागलयनिर्मितिस्तु काऽपि जायत एव, येन गीतानां सुमधुरस्वरेण गानं कर्तुं शक्यते। संस्कृतकवितायाः सरलीकरणे सर्वसामान्यीकरणे च प्रयासोऽस्माकम्। भाषाकाठिन्यमोचनाय गीतप्रवाहपरिरक्षणाय च कदाचित् जटिला व्याकरणानुशासनबद्धाः सन्धिनियमा नोररीकृताः, छन्दःशास्त्रानुमतिमनुसृत्य प्रह्लेतिसंयुक्ताक्षरपूर्वको वर्णोऽनेकत्र लघुरूपेणैव मतः, कदाचित् प्रचलनदृष्ट्यावश्यकमिति मत्वा अपरभाषाणां शब्दा अपि संस्कृते प्रयुक्ताः। अत्रत्यानां गीतानां विषया वैविध्यविराजिताः। जीवनस्य मधुर-कटु-तिक्तादयो येऽपि भावा अनुभवपथमायाताः, पुरातननूतना येऽपि विषया दृष्टिगोचरतामागताः, तेष्वनेके गीतेष्वत्र व्यञ्जिताः।

राष्ट्रिय-संस्कृत-संस्थानस्याङ्गभूतं गङ्गानाथझा-केन्द्रीय-संस्कृत-विद्यापीठमस्य गीतसङ्ग्रहस्य प्रकाशनं करोतीति मत्कृते परमतोषप्रदोऽयं सुसंयोगः, यतोऽस्मिन्नेव विद्यापीठे सप्तवर्षपूर्वमायोजित एकस्मिन् संस्कृत-कवि-सम्मेलने प्रथमं मञ्चस्थः सन् मया संस्कृतकाव्यपाठः कृतस्तदा तत्रोपस्थितैः काव्यमर्मज्ञैर्मनीषिभिः स्वसाधुवादवचोभिर्भूयानुत्साहो मे वर्धितः, कवनाय सत्प्रेरणा च प्रदत्ता। प्रस्तुत-पुस्तकस्य प्रकाशनप्रसङ्गे विद्यापीठस्यास्य प्राचार्यपदमलङ्कुर्वतां, विविधविद्याप्रवीणानां, सहृदयधुरीणानां डॉ० गयाचरण त्रिपाठिमहाभागानां सविशेषमनुगृहीतोऽस्मि, यैः सहर्षं सोत्साहप्रकर्षं पुस्तिकाया अस्याः प्रकाशनमङ्गीकृतं, पुनरङ्गीकृतं परिपालितमपि। तुष्टिकरोऽयं विषयो यत् तेषामाध्यक्ष्ये विद्यापीठात् शास्त्रीयवाङ्मयातिरिक्तं रचनात्मकसाहित्य-

मपि प्रचुरं प्रकाश्यते। संस्कृतकवीनां वर्धापनेन वस्तुतस्त एव वर्धापनभाजनानि। विद्यापीठस्यैव प्रवाचकपदभाजां कवित्वपाण्डित्योभययुतानां सुहृद्वराणां डा० जगन्नाथ-पाठकमहोदयानामपि परमकृतज्ञोऽहम्, यैर्यदाकदाचित् मत्काव्यालोचनक्षणे विविध-स्थलेषु स्वाभिमतप्रकटनेन सावधानीकृतोऽहम्।

'अहो भारो महान् कवेः' इति स्वल्पशक्तिनानेन बालकविना स्वस्मिन्नयं महान् भारस्तु धृतः, परमत्र काव्यालोचननिपुणानां मनीषिणां आशीर्यदि प्राप्येत तदा भार-वहनमिदं सुकरं भवेत्। काव्ये यदि दोषाः स्युस्तदा अप्रगल्भकृता इति मत्वा श्रीमद्भि-मर्षयितव्याः। गीतकन्दलिकेयं संस्कृत-काव्य-परम्पराया अग्रेसारिणी, मनागपि सहृदयहृदयहारिणी, सङ्गीतमयगीतसंवर्धनधारिणी, सुरगवीसुन्दरशृङ्गारकारिणी च सिद्ध्येत चेत् तदा कृतकृत्यं कार्यमात्मानं मन्येय इति विनिवेद्य रचनयानया विविधार्थविधातुः भूतात्मकजगतः भावात्मकजगतश्च सर्जकं 'कविं' समर्चयामि।

दीपमालिका — विनतः

दिनाङ्कः ४, नवम्बरमासः, १९८३ ई० — हरिदत्त शर्मा

प्रयागनगरम्

कविपुंस्कोकिलं मत्तं
हरिदत्तं न कः स्मरेत् ।
यस्य कूजितमात्रेण
काव्योद्यानं विजृम्भितम् ॥

—वाणीविलसितात्

समर्पणम्

सत्यधर्मैकनिष्ठानां भक्त्याप्लावितचेतसाम् ।
लहरीशङ्कराख्यानां विप्राणां सुमहात्मनाम् ॥
पितॄणां स्वर्गयातानां संस्मृतौ श्रद्धया मया ।
अर्प्यते सादरं सोऽयं गीतानां सुमनोऽञ्जलिः ॥

—हरिदत्तः

अनुक्रमणिका

गीतकन्दलिका

हरिदत्त शर्मा

कालिदास-वन्दनम्

नुमः काव्यलासं कविं कालिदासम्,
मनोहारि-कविता-रमण्या विलासम्।

रसासार - शृङ्गार - शृङ्गारितायाः,
सुगीर्वाणवाण्या हृदयहारि हासम्। ॥ नुमः० ॥

मनो ह्लादयन्तं रसस्यन्दनेन,
स्वरैस्तालकलितैर्हृदि स्यूतरासम्। ॥ नुमः० ॥

चिरानन्दवर्षं घनं भावराशिम्,
शरत्काश - सङ्काश - सत्कीर्तिवासम्। ॥ नुमः० ॥

द्रुमाणां लतानां कुसुम-किसलयानाम्,
गिरीणां नदीनां नदन्तं विलासम्। ॥ नुमः० ॥

कृतक्रीडनं मल्लिका - माधवीभिः,
निकुञ्जालि - शिप्रानदी-तीरवासम्। ॥ नुमः० ॥

घनप्रेमदूतं प्रियां प्रेषयन्तम्,
विरहगान - वीणानिनादप्रयासम्। ॥ नुमः० ॥

उमाया व्रतानां प्रभावैः कुमारे,
शिवं कल्पयन्तं तपःक्रीतदासम्। ॥ नुमः० ॥

प्रणयिमेलने विप्रयोगानले वा,
नयन्तञ्च शाकुन्तलं संविकासम्। ॥ नुमः० ॥

द्युतिं शारदीं वा रसं प्रावृषेण्यम्,
किरन्तं स्वकाव्यात् सुवासन्तवासम्। ॥ नुमः० ॥

प्रकृतिसौकुमार्यं प्रणयसौमनस्यम्,
जगच्चित्रयन्तं स-सौन्दर्य - भासम्।

नुमः काव्यलासं कविं कालिदासम्।

मम देशः

जयतु सदा मम देशः ।

हिमकिरीटराजितशुभभालः ।
धृतशुचिगङ्गायमुनामालः ॥
जलधिक्षालितचरणविशालः
कलितमनोहरवेषः । ॥ जयतु० ॥

प्रावृषि चपलायुतघनमाला ।
शरदि धवलशशितारकमाला ॥
मधौ लताद्रुमपल्लवबालाः
ऋतुषट्केलिनिवेशः । ॥ जयतु० ॥

विमलवेदवचनामृतधारा ।
भूमण्डले विततविस्तारा ॥
संस्कृत-संस्कृति-डिण्डिमनादै-
र्गुञ्जितदेशविदेशः । ॥ जयतु० ॥

'ज्योतिर्गमय' प्रथमो नादः ।
एको धर्मो मानववादः ॥
पावनगीता शिरसि च नीता
प्रसृतकर्मसन्देशः । ॥ जयतु० ॥

नवरविरुदितः प्रथमं प्रातः ।
वातः पूर्वं संस्कृतिवातः ॥
तिमिरगतानामबुधजनानां
प्रभाप्रसारिदिनेशः । ॥ जयतु० ॥

सुरभाषा

जयति सदा सुरभाषा ।

प्रथमालोकैर्भासितलोका
भारतजानामाशा ॥ ॥ जयति० ॥

देशे देशे प्रसृतो यस्या
वेदानां जयनादः ।
ईश्वर-सृष्टि-जीव-दर्शनषड्-
द्वैताद्वैतविवादः ॥ ॥ जयति० ॥

नवरससुधासुरसरित्सरसा
वक्रवचनघनसारा ।
ग्रथितगुणौघा ध्वनिगतिगहना
समुचितभूषणभारा ॥ ॥ जयति० ॥

जनितवती पाणिनिपतञ्जली
आदिकविं सव्यासम् ।
कालिदास-भवभूति-बाण-जय-हर्ष-
माघ-रवि-भासम् ॥ ॥ जयति० ॥

मोक्षमुलर-मुग्धानल-गेटे-
विलियम-विण्टर-कीथैः ।
विस्मितमतिभिर्विपुलवाङ्मयं
भरितं गौरवगीतैः ॥ ॥ जयति० ॥

नल-रघु-राम-कृष्ण-गुणरणनं
यक्षविरहसन्देशः ।
दमयन्ती-सीता-शकुन्तला-
करुणकथाविनिवेशः ॥ ॥ जयति० ॥

भवरुग्णानां ज्ञानभेषजं
तप्तानां जलदाली ।
जीवनवनसुखशीतलपवनो
मानससरसि मराली ॥ ॥ जयति० ॥

आत्मवसतिरियमार्यजनानां
भारतसंस्कृतिमित्रम् ।
सकलराष्ट्रसङ्घटनकारकं
रक्षणसूत्रपवित्रम् ॥ ॥ जयति० ॥

प्रयाण-गीतम्

चलन्तु वीरसैनिकाः, प्रयान्तु वीरसैनिकाः ।
सगौरवं सडिण्डिमं व्रजन्तु वीरसैनिकाः ।।
त्रिवर्णभारतध्वजं नमन्तु वीरसैनिकाः ।
धरातले स्ववीरतां प्रसारयन्तु सैनिकाः ।।

स्वलक्ष्यमस्तु केवलं विपक्षपक्षखण्डनम् ।
स्वशत्रुरक्तशोणितैः स्वभूमिभालमण्डनम् ।।
विमोहभीतिकम्पनं त्यजन्तु वीरसैनिकाः ।
चलन्तु वीरसैनिकाः, प्रयान्तु वीरसैनिकाः ।।

करे सुशस्त्रमण्डनं, स्वरे च सिंहगर्जनम् ।
जने जने व्रतं दृढं स्वमातृभूमिरक्षणम् ।।
स्वदेशपुण्यगौरवं स्मरन्तु वीरसैनिकाः ।
सदैव कर्मवीरता भजन्तु वीरसैनिकाः ।।

नभोविशालमण्डले जयध्वजप्रसारिणी ।
प्रयातु वीरवाहिनी कृपाणबाणधारिणी ।।
सुदुर्गमे जले स्थले, अटन्तु वीरसैनिकाः ।
चलन्तु वीरसैनिकाः, प्रयान्तु वीरसैनिकाः ।।

समुद्रदुर्गपर्वताः सहस्रमार्गबाधकाः ।
पदं न जातु कम्पतां, भवन्त्वसङ्ख्यकण्टकाः ।।
पदं सदैव वर्धताम्, मनोबलं प्रवर्धताम् ।
न कर्मधर्मभूमितः स्खलन्तु वीरसैनिकाः ।।

प्रचण्डभास्करातपोऽथवा हिमप्रवर्षणम् ।
पदं तु नावरोधयेत् कठोरवज्रवर्षणम् ।।
अखण्डपौरुषैर्धरां जयन्तु वीरसैनिकाः ।
चलन्तु वीरसैनिकाः, प्रयान्तु वीरसैनिकाः ।।

प्रयागप्रणमनम्

प्रणमामस्तीर्थेशप्रयागम् ।
तटिनीद्वयसङ्गमभूभागम् ॥

इतः प्रधावति पावनगङ्गा ।
यमुनाऽपरतश्चपलतरङ्गा ॥
श्वेतासितशाटिकाधारिणी धरणी लसति सरागम् । ॥ प्रणमामः० ॥

गङ्गोच्छलितधवलजलधारा ।
यामुनजलकृतनीलविकारा ॥
धरति सुवेणी शबलितरूपं शुचिसलिलं लसदाभम् । ॥ प्रणमामः० ॥

माघमासि प्रतिवर्षं मेला ।
भवति यदेयं शीतलवेला ॥
पुण्यभागिनो जना लभन्ते श्रेयःशमसुखलाभम् । ॥ प्रणमामः० ॥

प्रतिसुद्वादशवत्सरकालम् ।
कुम्भपर्व सञ्ज्वलति विशालम् ॥
कोटिकोटिसङ्ख्याका लोकाः सम्मिलन्ति प्रतिभागम् । ॥ प्रणमामः० ॥

कल्पवासनियमव्रतलग्नाः ।
जना वसन्ति भक्तिरसमग्नाः ॥
उटजनिवासं व्रतमुपवासं ते कुर्वन्ति विनाघम् । ॥ प्रणमामः० ॥

प्रवचनभजनं स्नानं ध्यानम् ।
कीर्तनसहितं वैदिकगानम् ॥
भक्तजनैर्जयशब्दवर्धितो नादो याति खभागम् ।
प्रणमामस्तीर्थेशप्रयागम् ।

सागर-तरङ्गाः

अवनिरङ्गकृतशतशतभङ्गैः
सलिलगतैरुत्तालतरङ्गैः ।
कृतनिजकेलिविसारम्
पश्यत पारावारमपारम् ॥

दिशि दिशि विलसति तीव्रजवेन
लहरीणामुच्छलनम् ।
जलनिधितीरं गहनगभीरं
धत्ते हरर-ध्वननम् ॥

कूर्दति धावति चलति सवेगं
सलिलं गत्वा पारम् । ॥ पश्यत० ॥

नवयुवतीनां जलकन्यानां
सोल्लासं ध्वनिहेला ।
तीरस्पर्शानन्तरधावन-
मनवरतेयं खेला ॥

भवति यथा कैशोर्यकालिकी
क्रीडा वारं वारम् । ॥ पश्यत० ॥

श्वेततन्तुमयरज्जुनिर्मिता-
मधिरुह्य द्रुतदोलाम् ।
सलिलसुन्दरीगणो यथायं
विहरति केलिविलोलाम् ॥

सुघनयौवनं नृत्यति नूनं
लब्धोत्प्लावनभारम् । ॥ पश्यत० ॥

सिन्धुपतिः फेनिलविष्टरणं
धवलं स्वं रतिशयनम् ।
रचयति तटिनीप्रियाजनेभ्यः
सामन्त्रणरवगहनम् ॥

रसमयहृदये भावतरङ्गाः
संस्फुरन्ति सविकारम् ।
पश्यत पारावारमपारम् ।

वर्षागीतम्

श्यामलिताः सकला दिग्देशाः ।
अङ्कुरिता धरणी नववेषा ॥
गगने मेघाडम्बरवृन्दै-
विततं निजं वितानम् ।
विलोकय वर्षाणामायानम् ।
पश्य सखि ! वर्षाणामायानम् ॥

शीतसलिलबिन्दूनां पतनम् ।
वेगयुतं मरुतां सञ्चलनम् ॥
गहनगर्जनं यथा कामनृप-
दुन्दुभितुमुलध्वानम् । ॥ विलोकय० ॥

मुदितमयूरैर्नृत्यपरीतम् ।
मेघशुभागमगीतं गीतम् ॥
मण्डूकैः सलिलाशयमध्ये
रचितं टर्टरगानम् । ॥ विलोकय० ॥

हरितीभूता वनतरुमालाः ।
सरसकदम्बकदम्बतमालाः ॥
शक्नुवन्ति चेक्षितुं न पथिका
जलभरितं पन्थानम् । ॥ विलोकय० ॥

संरचिताः शतशतप्रणालिकाः ।
तारयन्ति निजतरीर्बालिकाः ॥
जलखेलालालसबालानां
स्वगृहेभ्यो निर्याणम् । ॥ विलोकय० ॥

स्फुरति दामिनी मुहुराकाशे ।
लसति कामिनी प्रियभुजपाशे ॥
अभनग् घनगर्जनमतिघोरं
मानवतीनां मानम् । ॥ विलोकय० ॥

परमप्रसन्नाः कर्षकरामाः ।
बीजवपनलग्ना अभिरामाः ॥
दृश्यन्ते कृषिभुवि श्रावणे
गायन्त्यो मृदुगानम् । ॥ विलोकय० ॥

क्वचिदविरलजलधारासारः ।
भवति निरुद्धो जनसञ्चारः ॥
अतिक्रम्य प्रवहन्ति तटिन्यः
स्वां स्वां तटसीमानम् । ॥ विलोकय० ॥

उपशमिते घनतडिद्विलासे ।
इन्द्रधनुः प्रकटितमाकाशे ॥
सप्तवर्णसुषमया नु जातं
जनलोचनसुखदानम् । ॥ विलोकय० ॥

विश्वविरहिशुग्दर्पणभूतम् ।
वर्षर्तोः सुफलं घनदूतम् ॥
गीतिकाव्यमुदितं च प्राप्य कवि-
कालिदासप्रतिभानम् ।
विलोकय वर्षाणामायानम् ।
पश्य सखि ! वर्षाणामायानम् ॥

काल्पनिकमुड्डयनम्

क्वचिद्दतिदूरं निर्जनघोरं
चल रे मानस मन्दं मन्दम् ।

द्रुमलतिका नवकलिकाकलिताः ।
यत्र समीरलालिता ललिताः ॥
गुञ्जन्मञ्जुमिलिन्दमालिका
भ्रमति पिबति मकरन्दम् । ॥ चल रे० ॥

पर्वतभूमिसु सलिलप्रपाताः ।
प्रवहन्तो हिमशीतलवाताः ॥
धावति धवला धारा पयसां
गिरिमध्ये स्वच्छन्दम् । ॥ चल रे० ॥

दिवसान्ते खगकुलकलगानम् ।
चटकानां निजनीडायानम् ॥
श्वेतपीतलोहितं रञ्जनं
धरति गगनमरविन्दम् । ॥ चल रे० ॥

क्वचिदतिगहनगगनवनजाले ।
रहसि ततद्युतितारकमाले ॥
सितवसना यामिनी कामिनी

यत्र मिथो मिलतोऽवनिगगने ।
अरुणाभो रविशिशुरुद्गमने ॥
चल तदङ्गणं रुचिरं प्रकृतेः
तर भवकण्टकवृन्दम् । ॥ चल रे० ॥

लहरीध्वनिविततस्वरतारे ।
क्वचिदपारजलनिधिविस्तारे ॥
जलपोतानां चलनं सततं
वीचिकलकलं मन्द्रम् । ॥ चल रे० ॥

उपतारकमधिहिमगिरिशृङ्गम् ।
मध्येऽम्बरमपि पारेगङ्गम् ॥
विविधविचित्ररहस्यराजिते
भ्रम जगति स्वच्छन्दम् । ॥ चल रे० ॥

नौश्चलितैका तटिनीनीरे ।
नयतु च नौ क्वचिदविदिततीरे ॥
सकलकलं संसारं त्यज रे
विहर शनैः सानन्दम् ।
चल रे मानस मन्दं मन्दम् ॥

नवमभियानम्

मानवते ! कुरु नवमभियानम् ।
त्यज गलितं पलितं पन्थानम् ॥

जातिवर्णभेदैस्त्वं छलिता ।
शोणितरञ्जितभूष्वपि चलिता ॥
छिन्धि युद्धविद्वेषवितानम् । ॥ मानवते० ॥

हिन्दु-यवन-सिख-खिष्ट-विभेदैः ।
गौर-कृष्ण-नीचोच्च-प्रभेदैः ॥
जातं ते खण्डितं पुराणम् । ॥ मानवते० ॥

वर्षतु जगति रागरसधारा ।
भवतु मही गतवैरविकारा ।
स्नेहसरसि कुरु विमलं स्नानम् । ॥ मानवते० ॥

भवतु न सबलैर्दुर्बलघातः ।
धनपतिभिर्निर्धनपरिपातः ।
नास्तु च शोषकशोषितभानम् । ॥ मानवते० ॥

भवतु न कोऽपि दरिद्रो दीनः ।
अशनवसनवासैरपि हीनः ॥

परितो भौतिकताविस्तारः ।
पतितो जडतायां संसारः ॥
यन्त्रैश्चूर्णितमात्मज्ञानम् । ॥ मानवते० ॥

यमविपाकविस्फोटद्रव्यैः ।
अणुशक्त्याविष्करणैर्नव्यैः ॥
प्रलयङ्करमभवद् विज्ञानम् । ॥ मानवते० ॥

बाह्यचमत्कृतिचकितं स्वान्तम् ।
नालोकयति निगूढं ध्वान्तम् ॥
कुरु चेतसि नव्यं द्युतिदानम् । ॥ मानवते० ॥

धनमनुधावति सततं लोकः ।
भवति दुःखनैराश्यदशोकः ॥
क्रियतां जनैश्चरित्रोत्थानम् । ॥ मानवते० ॥

प्रतिहृदयं दीप्येत प्रकाशैः ।
विकसतु प्रतिवदनं सुखहासैः ॥
प्रसरतु दिशि दिशि तव जयगानम् ।
मानवते ! कुरु नवमभियानम् ।

विरहविधुरागानम्

श्रृणु मे मातः !
श्रावणमासोऽप्यायातः ।
नाद्य प्रेयानायातः ॥
स्फुरति गगनतले दामिनी ।

शप्तं तेन गमनकाले सखि !
नचिरागमनं नूनम् ।
प्रिये ! पश्य विरहे वर्धिष्यत उभयोः प्रेमप्रसूनम् ॥
विस्मृतिगर्तं नीता रे
ते ते शपथाः पीता रे
दग्धा विरहदहने कामिनी । ॥ श्रृणु मे० ॥

दृश्यन्ते परितोऽमूः श्यामा
मेघाडम्बरमालाः ।
अविरलवर्षण-गहनगर्जनैः
कम्पन्ते नववालाः ॥
घनतमसा छन्ने गगने
चलिते सुखशीतलपवने
भवति कामेहा मे स्वामिनी । ॥ श्रृणु मे० ॥

उदितं धनुरैन्द्रं मम हृदयं
विध्यतीव खरवाणैः ।
प्रियहीनां भीषयति मन्मथ-
श्चपलाचपलकृपाणैः ॥

भूमौ करकासम्पातः
चित्ते चाघातो जातः
धारा ध्वनन्ती मे ह्लादिनी। ॥ शृणु मे० ॥

शिखियुगलस्य विलोक्य मधुरं
नृत्योल्लासविलासम्।
न सहे मण्डूकध्वनिमरसं
न सखीजनपरिहासम् ॥
वाता धृततापा जाताः
सततं जलबिन्दुनिपाताः
मानं धरति का मानिनी। ॥ शृणु मे० ॥

अलिजनमालि ! मदकलं कुरुते
नवकदम्बरसवृन्दम्।
युवतिसमूहो गायति गीतं
सह मधुपैः सानन्दम् ॥
दोलाक्रीडास्वनुरक्ताः
सख्यः सुखसङ्गमसक्ताः
जाता सवैरा मे यामिनी। ॥ शृणु मे० ॥
स्फुरति गगनतले दामिनी ॥

वसन्तविलसनम्

अहो ऋतुराज ! तव नवलसनं रे ।
प्रिय मधुमास ! तव रसरसनं रे ॥

तरुलतिकानां रम्यं रूपं
यौवनं रे
सखि ! प्रतिविपिनं रे ।
फुल्लकुसुमानि
सखि ! प्रतिविपिनं रे । ॥ अहो ऋतुराज० ॥

रुचिररसाले मधुकरवृन्दं
दृश्यते रे
कृतमृदुरवणं रे ।
पिबति मधूनि
कृतमृदुरवणं रे । ॥ अहो ऋतुराज० ॥

सरसवसन्ते श्रुतिसुखकारी
श्रूयते रे
सखि ! कोकिलरागः ।
भरितदिगन्त—
—कलकोकिलरागः । ॥ अहो ऋतुराज० ॥

अरुणपलाशाः पाटलमाला
माधवी रे
मृदुबकुलतमालाः ।
अहो विकसन्ति
मृदुबकुलतमालाः । ॥ अहो ऋतुराज० ॥

सर्षपपुष्पैरापीताभैश्
छादिता रे
सखि ! धरणीरमणी ।
पीतपरिधान—
—धरधरणीरमणी । ॥ अहो ऋतुराज० ॥

कुसुमसुरभितो मन्दं मन्दं
प्रेरितो रे
सखि ! मलयजवातः ।
मदनविबोध—
—करमलयजवातः । ॥ अहो ऋतुराज० ॥

॥ प्रिय मधुमास० ॥
॥ अहो ऋतुराज० ॥

गोपवधूटीप्रेरणम्

यमुनापुलिने विहरति माधवो रे ।
चल सखि कुञ्जं, काननकुञ्जं,
चल सुकुमारि । ।। यमुनापुलिने० ।।

श्यामलमेघैरावृतमम्बरं रे ।
प्रियसखि मन्दं, जनितानन्दं,
वर्षति वारि । ।। यमुनापुलिने० ।।

विलसति लतिका ललितसुनर्तने रे ।
सखि तद्वलनं, पवनविचलनं,
मदनविकारि । ।। यमुनापुलिने० ।।

सघनकरीरा बकुलकदम्बका रे ।
घनतरुजालं, तिमिरविशालं,
ते सहकारि । ।। यमुनापुलिने० ।।

विपिने हरिकृतवेणुसुवादनं रे ।
शृणु सखि स्वणं, रमणविहरणं,
मानसहारि । ।। यमुनापुलिने० ।।

रासविलासैः रसमयकेलिभी रे ।
सखि तद्रमणं, क्रीडाकरणं;
कौतुककारि । ।। यमुनापुलिने० ।।

अभिसर काले रतिरसरञ्जिते रे ।
सखि हर लज्जां, कुरु शुचिसज्जां,
चल वरनारि । ।। यमुनापुलिने० ।।

बहुलविकारा जीवनधारा

जीवनधारा विविधप्रकारा
बहुलविकारा रे।

वहति शनैः सुखशीतलवातः।
पतति कदापि विपत्सङ्घातः॥
गतिरस्या महतामपि गूढा
गहनापारा रे। ॥ जीवनधारा० ॥

जन्मविवाहविलाससुहासः।
क्वचिदपि बन्धुवयस्यविनाशः॥
भवति नववधूर्विधवा काचिन्
मृदुकौमारा रे। ॥ जीवनधारा० ॥

अनभीप्सितलोकैः सह यानम्।
विवशीभूय विषमविषपानम्॥
पङ्कक्षेपणमनिशं साधुषु
खलकुविचारा रे। ॥ जीवनधारा० ॥

शुचिसुकृतेषु सततमवरोधः।
स्वहितं विना परार्थविरोधः॥
सुजनानां बहुविधं शोषणं
दुरिताचारा रे। ॥ जीवनधारा० ॥

धनिकानामतिधनसङ्ग्रहणम्।
यन्त्रतले निर्धनजनमरणम्॥
श्रमजलप्रवहणकर्तुः क्षुधिता
गृहपरिवारा रे। ॥ जीवनधारा० ॥

दण्ड्यानां स्वच्छन्दविचरणम् ।
बलदृप्तानां स्वेच्छाचरणम् ॥
अत्याचारान्यायपीडनं
पापप्रचारा रे । ॥ जीवनधारा० ॥

सकलयत्नकृतकर्मविफलनम् ।
चिरमधुराशालतिकादलनम् ॥
मृदुलभावनातन्तूपरि हत-
—भाग्यप्रहारा रे । ॥ जीवनधारा० ॥

दुःसहविषयाणामपि सहनम् ।
वचनवतामपि मूकीभवनम् ॥
जीवनमपि मरणं, क्रियते निज-
—गृहमपि कारा रे । ॥ जीवनधारा० ॥

अधिराजोऽपि भवत्यतिदीनः ।
बहुवैभवमर्जति धनहीनः ॥
उच्चावचमारोहत्येषा
यथा रथारा रे । ॥ जीवनधारा० ॥

क्षणिको नु सुखबुद्बुदव्यूहः ।
कठिनो दुःखावर्तसमूहः ॥
सेयं कण्टकजालनिबद्धी-
—कृतसंसारां रे ।
जीवनधारा विविधप्रकारा
बहुलविकारा रे ।

जय कविकर्मकले !

भावजगति मधुरामृतवर्षिणि !

जय कविकर्मकले ।

जय कविकर्मकले ॥

कविकल्पनाकृतप्राकारः ।
परमविचित्रस्ते संसारः ॥
कविविधिरेव प्रभुः स्वच्छन्दो यद्रचने सकले । ॥ जय० ॥

जनयसि सहृदयहृदयाह्लादम् ।
क्षपयसि वै हृद्‌गतमवसादम् ॥
नयसि च नो दूरं क्वचिदविदितलोकातीततले । ॥ जय० ॥

जडमपि नयसि हि चेतनभावम् ।
मलिनमनसमपि शुभ्रसुभावम् ॥
नियतिनियमरहिता त्वमबद्धा कारणकार्यफले । ॥ जय० ॥

विरहिणि मुञ्चति निशि सुस्वापम् ।
शीतलचन्द्रो विकिरति तापम् ॥
हिमकरकर-घनसार-समीरा अपि विदहन्त्यनले । ॥ जय० ॥

नवमालिका भजति रतिभावम् ।
विदधति लतास्त्वयास्रस्रावम् ॥
ग्रावा रोदिति वज्रहृदयमपि भार्गं भजति दले । ॥ जय० ॥

घनदूतोऽत्र नयति सन्देशम् ।
हंसो भ्रमति प्रियाप्रियदेशम् ॥
उच्छ्वसन्ति कुसुमानि विकाले तरुतिलके बकुले । ॥ जय०॥

ऋतुमपि ऋते घनघटागमने ।
अकलङ्को विधुरुदयति भवने ॥
बालावदनवारिजं विकसति भुवि चासति कमले । ॥ जय०॥

मधुरस्ते रसपारावारः ।
प्रीतिकरो नवरससञ्चारः ॥
परमानन्दो भवति नयनयोः प्रवहति करुणजले । ॥ जय० ॥

यासि गगन-गिरि-गह्वरपारम् ।
अपि रचिण दुर्गं संसारम् ॥
जीवनतत्त्वं जीवति चेतसि सति ते महति बले । ॥ जय० ॥

किं त्वं कर्तुमकर्तुमसारा ।
क्व न ते प्रौढा ज्योतिर्धारा ।
कुरुषे कविकल्पनाप्रसारं भुवनतले सकले ।
जय कविकर्मकले ॥

वयं भारतीयाः

वयं भारतीया, वयं भारतीयाः ।
इयं पुण्यभूमिर्जनन्यस्मदीया ॥

उत्तरे भारते दक्षिणे वा वसामः ।
केरला गुर्जरा बङ्गजा वा भवामः ॥
वयं ह्यैक्यबद्धा वयं शोभनीयाः । ॥ वयं भारतीयाः० ॥

हिन्दवो मुस्लिमाः ख्रिष्टिया वा जनाः ।
पारसी-सिक्ख-बौद्धास्तथा ये जिनाः ॥
समे बन्धवो भ्रातरो नः स्वकीयाः । ॥ वयं भारतीयाः० ॥

संस्कृतं कन्नडं तेलुगुं वा लिखामः ।
आङ्ग्ल-हिन्दी-मराठी-स्वरैर्वालपामः ॥
निजा राष्ट्रभाषा परञ्चाद्वितीया । ॥ वयं भारतीयाः० ॥

प्राक्तनी चामरा नो दृढा संस्कृतिः ।
गौरवालङ्कृता ह्यार्यजा सन्ततिः ॥
विदेशेषु जाता वयं कीर्तनीयाः । ॥ वयं भारतीयाः० ॥

स्वभूमेः सुमाला सिता गाङ्गधारा ।
यशो घोषयन्तो हिमाद्रेस्तुषाराः ॥
त्रिवर्णी पताका सदा वन्दनीया । ॥ वयं भारतीयाः० ॥

इयं कर्मभूमिस्त्वियं धर्मभूमिः ।
वयं चात्र जाता स्त्वियं जन्मभूमिः ॥
मृदस्माभिरस्याः सदा सेवनीया । ॥ वयं भारतीयाः० ॥

अनैक्येऽपि चैके विभेदेष्वभेदाः ।
वयं त्वात्मनैके, प्रमाणं ह्नि वेदाः ॥
दृढैवात्मिकी संहृतिः स्थापनीया । ॥ वयं भारतीयाः० ॥

रत्नगर्भा च शस्याभिरामा स्वभूः ।
शौर्यगाथायुता शूरवीरप्रसूः ।
परा ज्ञानधाराऽभवन्मार्गणीया । ॥ वयं भारतीयाः० ॥

महद् वाङ्मयं स्वेतिहासः पुराणः ।
जयिन्यात्मशक्तिः, कृपाणो न बाणः ॥
वयं पूर्वजाः शिक्षका अर्चनीयाः । ॥ वयं भारतीयाः० ॥

महत्सङ्कटे कण्टके वा भवामः ।
कदाचिन्न स्वत्वं निजं विस्मरामः ॥
इयं धारणा सर्वदा धारणीया ।

वयं भारतीया, वयं भारतीयाः ॥

नवयौवननवलसितम्

नववयसि लसति तेऽङ्गेषु,
वहति हृदि मृदुधारा ।

अविदितभावा अभिनवहावाः
संस्फुरन्ति बहुवारम् ।
बालचपलता परिणतरूपा
धत्ते यौवनभारम् ॥
त्वमेधिततनुभारा । ॥ वहति० ॥

मुग्धनयनदेशा लक्ष्यन्ते
रुचिरकज्जलश्यामाः ।
वचने गानं गमने नटनं
शृङ्गारा अभिरामाः ॥
हारिणो व्यापाराः । ॥ वहति० ॥

नयनापाङ्गे निशितसायका
उद्भूताः सविलासाः ।
विदधति युवजनहृदयवेधनं
कृतमादकतावासाः ॥
प्रियामन्त्रणसाराः । ॥ वहति० ॥

प्रत्यङ्गं ते लसति मार्दवं
त्वमलसगमना जाता ।
संलापेषु कपोलरञ्जनं
व्रीडा त्वामनुयाता ॥
मनोवासितमारा । ॥ वहति० ॥

उच्छ्वासेषु सुपद्मसौरभं
वदने पाटलवासः ।
स्नाते लावण्यामृतपूरे
वपुषि चन्द्रिकाहासः ॥
स्मिते कलिकासाराः । ॥ वहति० ॥

गतकैशोर्यमये ! नववयसः
प्रथममिदं सोपानम् ।
पथि ते पतति हि नयनसहस्रं
धीरतया कुरु यानम् ॥
तरुणि ! कृतसविकारा । ॥ वहति० ॥
॥ नववयसि० ॥

विश्व-बाल-वर्षम्

जना ! मानयत बालकवर्षम् ।
देशे देशे बालकवर्षम् ।
अन्ताराष्ट्रिय - बालकवर्षम् ॥

विश्वविपिननवकलिका बालाः ।
गगनोदीयमानशशिमालाः ॥
कुरुतैषां सुविकासविमर्शम् । ॥ जनाः० ॥

विकसतु तद्वदनेषु सुहासः ।
अक्षिषु चाशाकिरणविभासः ॥
तज्जीवनैर्योजयत हर्षम् । ॥ देशे० ॥

बहुशिशवः पितृमातृविहीनाः ।
क्षुधित-दरिद्र-दलित- बहुदीनाः ॥
सहमाना दुस्तरसंघर्षम् । ॥ अन्ता० ॥

जर्जरजीर्णवसनधर-नग्नः ।
ग्रामे भ्रमति स क्रीडालग्नः ॥
दयां कुरुत तं दर्शं दर्शम् । ॥ जनाः० ॥

उदरभरणहेतोरविरामम् ।
भिक्षाटननिरतं लघुरामम् ॥
पश्यत तद्दुःखं दुर्धर्षम् । ॥ देशे० ॥

परसेवार्पितजीवनसारः।
उच्छिष्टाशनमेवाहारः॥
चिन्तयतास्य किमप्युत्कर्षम्। ॥ अन्ता० ॥

साक्षरता प्रसरतु प्रतिगेहम्।
समभावैः शिक्षा सस्नेहम्॥
नयत विवृद्धिं ज्ञानप्रकर्षम्। ॥ जनाः० ॥

वर्ण-वर्ग-धनि-निर्धनभेदाः।
बालविकासे न-कृतच्छेदाः॥
नेच्छत प्रतिभानामपकर्षम्। ॥ देशे० ॥

कुण्ठित-कुपथगामि-संत्रस्तः।
बालगणो ह्यपराधैर्ग्रस्तः॥
स्वसमाजं दर्शयत्यमर्षम्। ॥ अन्ता० ॥

स्वस्थसुमतिबालकनिर्माणम्।
भवतु तदेव सफलमभियानम्॥
भव्यमिमं स्थापयतादर्शम्। ॥ जनाः० ॥
॥ देशे० ॥
॥ अन्ता० ॥

कविकुलकीर्तनम्

समलङ्कृतसाहित्यशरीरः सितशारदासुहासः ।
जयति सदा सुरगवीकवीनां वाणीविशदविलासः ॥

× × × × ×

प्रथमं प्रथमकविं वन्दे धृतरामायणरसबिन्दुम् ।
शोको यस्य गतः श्लोकत्वं करुणाप्लावनसिन्धुम् ॥

विश्वविविधविज्ञानपूरितं गहनगिरां निर्यासम् ।
भारतभुवि भारतं निर्ममे नौमि मुनिं तं व्यासम् ॥

रससिद्धं श्रृङ्गारराजितं कविताबधूविलासम् ।
प्रेम-प्रकृति-सौन्दर्य-सङ्गमं कविगुरुसुकालिदासम् ॥

यस्य रवेरिव सुकवेराभा हृदयचमत्कृतिसारा ।
कूटनीतिवर्णनसमन्विता कविता सार्थजभारा ॥

नवनवशब्दसङ्घटननिपुणस्त्रिगुणकलापथभागः ।
अलङ्कारबहुभारधारकः कविवरघण्टामाघः ॥

श्रृङ्गारामृतचन्द्रशीतलः प्रणयकविः सुकुमारः ।
दृढदर्शनपरिशीलनक्षमो जयति स नैषधकारः ॥

× × × × ×

बहुविधनाटकचक्रकारकः कवितामञ्जुलहासः ।
भारतरामोदयनरूपकैः कृतशिल्पः कविभासः ॥

जनजीवनसामान्यवर्णनं विविधवर्गपरिरम्भः ।
जातो मृच्छकटिकसंरचने नवपरम्परारम्भः ॥

कूटनीतिरणवर्णननिरतो मुद्राराक्षसकारः ।
विक्रमशौर्यकथासंवलितो वरवेणीसंहारः ॥

रत्नावली - दर्शिका - नागानन्द - कवनविन्यासा ।
मृदुलभावरसभरिता जयिनी निपुणहर्षकविभाषा ॥

पाषाणद्रवणं कारुण्यं यत्सत्काव्यप्रसूतिः ।
शोकधराजलधारसेचको जयति सुकविभवभूतिः ॥

× × × × ×

कं न हरति कविदण्डिसुगद्ये ग्रथितं पदलालित्यम् ।
श्लेषनिवेशिसुबन्धुसुबन्धैः सरसगद्यसाहित्यम् ॥

अद्भुतार्थकल्पनावैभवं ह्यलङ्कारवनं हृद्यम् ।
वाणी - पञ्चबाण - पञ्चानन - नाम - बाणकविगद्यम् ॥

ललितमृदुलसङ्गीतगुम्फिता भावमयी कल्याणी ।
रसमयहरिरतिवर्णनसारा श्रीजयदेवसुवाणी ॥

मृदुझङ्कृति-रणरणितकारिणी रस-लहरी-सविलासा ।
मृद्वीका-मधु-मधुरा रमते पण्डितराजसुभाषा ॥

× × × × ×

अमरगिरा मधुरामृतवर्षिणि कूजति कविपिकपुञ्जे ।
सहृदयरसिकगणः सानन्दं रमते कविताकुञ्जे ॥

प्रकृतिदेवि ! त्वम्

कथं कुप्यसि सुजनतायै
सदैव प्रकृतिर्देवि ! त्वम् ।
कथं पातयसि दुःखौघै
सदैव प्रकृतिदेवि ! त्वम् ॥

कदाचिद् घोरजलवृष्टिः
कदाचित् शुष्कतासृष्टिः ।
वज्र - हिमपात - भूकम्पैः
प्रलयमानयसि देवि ! त्वम् ॥ ॥ कथं० ॥

सदा वर्षासु संलक्ष्यं
जलस्योत्प्लावनं भीमम् ।
सुनद्यः सागरायन्ते
समुल्लङ्घन्ति कूलं स्वम् ॥ ॥ कथं० ॥

निमग्ना दुर्गजलपूरे
जनाः पशवो गृहाः सर्वे ।
प्रेक्ष्य सास्रं नयनजालं
जनानां किं न दयसे त्वम् ॥ ॥ कथं० ॥

प्रखररविकिरणसन्तप्ता
ज्वलति सा नीरसा धरणी ।
घना रुष्टाः क्व संयाताः
न वर्षति शुष्कभुवि सलिलम् ॥ ॥ कथं० ॥

क्षणे प्राणैर्वियुज्यन्ते
सुतापैस्ताडिता जीवाः ।
भूमिभूताम्नशस्यालिं
दहस्यनलेन देवि ! त्वम् ॥ ॥ कथं० ॥

करालं कालदं चलितं
च चक्रं चक्रवातानाम् ।
ग्राम-पुर-जन-धनादीनां
न पश्यसि नाशलीलां त्वम् ॥ ॥ कथं० ॥

सुपेषः क्रूरपाषाणै-
र्भवति हा मनुजदेहानाम् ।
यदा भूकम्पनं भयदं
समाक्रामति जनं सर्वम् ॥ ॥ कथं० ॥

कदाचित् सततहिमपातश्-
च झञ्झावातसङ्घातः ।
पश्वकृषि-पशु-खगादीनां
विनाशं वहसि देवि ! त्वम् ॥ ॥ कथं० ॥

क्वचित् सन्दूषणं वायोः
प्रसारोऽसाध्यरोगाणाम् ।
त्रितापैस्तप्यमानानां
न तापं हरसि देवि ! त्वम् ॥ ॥ कथं० ॥

जलानलधरणिपवनानां
जगज्जीवनदतत्त्वानाम् ।
न कार्यं भवतु विपरीतं
सदा शुभदैधि देवि ! त्वम् ॥

कथं कुप्यसि सुजनतायै
सदैव प्रकृतिदेवि ! त्वम् ॥

अयि निर्दयनिर्धनते !

अयि निर्दयनिर्धनते ! ब्रूहि
कदा किं किं नो कृतम् ।
त्वया किं किं नो हृतम् ॥

सदा सोढः समृद्धानां कठोरो वचनशरघातः ।
प्रताडनयातनासहनं नित्यनियमो नु मे जातः ॥
अहं पिष्टश्च शोषणचक्रमध्ये प्राप्य संवासम् ।
पराधीनोऽभवं मूको निरुध्य स्वैरनिःश्वासम् ॥ ॥ अयि० ॥

न सेवावृत्तिरुपलब्धा प्रभूतोत्कोचहीनेन ।
स्वमानो नाशितोऽमूल्यो मसृणचाटूक्तिदीनेन ॥
निजं स्वत्वञ्च विक्रीतं बहुदारेष्वहं भ्रान्तः ।
अकरवं स्वात्मधिक्कारं निराशाकुण्ठताक्रान्तः ॥ ॥ अयि० ॥

पिताहं पञ्चपुत्रीणां यदा वरशोधने यातः ।
न रूप्यकलक्षसङ्ख्याकं विना वार्तास्ति भोः भ्रातः ॥
प्रशीतक - दूरदर्शन - वीजन - द्रुतयाननवनव्यैः ।
भरतु भवनं हि तेनोक्तं समैरधुनातनैर्द्रव्यैः ॥ ॥ अयि० ॥

प्रभूता मूल्यसंवृद्धिर्नभश्चुम्बति महार्घत्वम् ।
दिनैर्लघु कैश्चिदल्पं वेतनं मे याति शून्यत्वम् ॥
ऋणं सङ्गृह्य मासान्ते कथञ्चिद् यापिता दिवसाः ।
अभावैर्ग्रस्यमाना एव मे कौटुम्बिका विवशाः ॥ ॥ अयि० ॥

जलैरालोड्यते बहु मेघकाले मद्गृहं जीर्णम् ।
कुट्टङ्कात् पतति पानीयं च परितो भूतले कीर्णम् ॥
ग्रहीतुं भाटकं तस्य स्थितो द्वारे गृहस्वामी ।
न लभते परगृहावासी कदाचित् सुखं सुखकामी ॥ ॥ अयि० ॥

स्वपत्न्याः शाटिका क्रेया च नववसन नि ललितायाः ।
मुकुर-पट-तैल-कङ्कतिकादिसामग्री सुरभितायाः ॥
मुकुल-मधु-वापिनां परिधान-पुस्तक-शुल्कबहुभारः ।
विना मुद्रास्तु लज्जायै मुधा हट्टेषु सञ्चारः ॥ ॥ अयि० ॥

सुदीर्घा दृश्यते पंक्तिर्विपणिषु च सर्वकारस्य ।
शरव्या मादृशा भ्रष्टत्वचौर्यासत्प्रसारस्य ॥
चणक-गोधूम-तण्डुल-शर्करा-घृत-दुग्ध-भक्ष्याणाम् ।
अभावैः कृत्रिमैः खिन्नाः सततमुपभोग्यपण्यानाम् ॥ ॥ अयि० ॥

श्रमस्वेदप्रवाहं कुर्वतो मे जीवनं वीतम् ।
कदाचित् प्रतिफलं कर्मानुरूपं मया न गृहीतम् ॥
त्वयानालिङ्गितः जानाति न हि ते कठिनपरितापम् ।
अहो दारिद्र्य! मन्ये त्वां तु दानवरूपमभिशापम् ॥ ॥ अयि० ॥

प्रकृतिसमाह्वानम्

अहो चन्द्र ! ते चन्द्रिका शीतला रे
जनानां च प्राणप्रदा ते सुधा रे ।
न दर्पः प्रशस्तिर्न चैवाभिमानः
सुकीर्तिः स्वयं विस्तृता चोज्ज्वला रे ॥

अहो मेघमाले ! सलिलवर्षणं ते
प्रशुष्यद्धरायै रसाकर्षणं ते ।
वहसि जीवनं सर्वकल्याणहेतोः
व्रतं स्वार्थहीनं पराह्लादनं ते ॥

अहो द्रुमलता ! अन्यसेवानुचरणम्
निजे मस्तके ग्रीष्मसन्तापसहनम् ।
सुखं छायया सेव्यते श्रान्तपान्थैः
सुकर्तव्यमादौ तवैवानुकरणम् ॥

अहो मानव ! त्वं प्रविश बाह्यकक्षम्
प्रकृतिशक्तिरेषास्ति रे त्वत्समक्षम् ।
कथं गच्छसि त्वं ततो भिन्नमार्गम्
असत्त्वञ्च हित्वा लभेथाः सुपक्षम् ॥

धनस्यार्जने तं विशेषेण सङ्गः
मुधाऽसत्यवादास्तथा स्वोक्तभङ्गः ।
मृतस्यापि शयनाद् धनान्यर्जयध्वे
सुमुद्रैकलब्ध्यै परप्राणभङ्गः ॥

लक्ष्यं न ते स्वोदरापूरणं रे
कियद् दूषितं स्यात्तु तत्साधनं रे।
सुदीने घृणा कोपनं निर्बलेभ्यः
परं स्वार्थसिद्ध्यै परापीडनं रे ॥

अहो कोकिले ! मधुमयं कूजनं ते
प्रसारय निजं वाग्गुणं प्रतिजनं रे।
कटूद्वेगि रूक्षं वचो भाषते यः
प्रशिक्षय जनं तं मनोरञ्जनं रे ॥

अहो चातक ! प्रेममार्गानुसरणम्
तवाङ्गारमन्नं प्रियाह्वानकरणम् ।
सुलीलाविलासं त्विदं मन्यमानम्
जनं बोधयैतत् तपस्यानुचरणम् ॥

अहो नदनदीसागरा ! बहुविशालाः
वनश्रेणि - विहगावली - मेघमालाः ।
निजैः सद्गुणैः कर्मभिः स्वैः स्वरूपैः
दिशत मानवं सत्पथं वृक्षवालाः ॥

मधुरं शैशवजीवनम्

रम्यं रम्यं रमते बाल्यं
मधुरं शैशवजीवनम् ।
नैवाह्लादकरं मे किञ्चिद्
वृद्धत्वं न च यौवनम् ॥

मुग्धमना मूको निराकुलस्-
त्विह लघुजीवो जायते ।
चकितं चकितं पश्यति परितो
विततं संसृतिकाननम् ॥ ॥ रम्यं रम्यं० ॥

रजसाङ्गं धूसरितं सकलं
नयनं कज्जलकल्पितम् ।
मन्दं मन्दं सरति जानुभिः
पयसा कृतमुखलेपनम् ॥ ॥ रम्यं रम्यं० ॥

लौह-पत्र-मृण्मय-गजादिभिः
खेलसि चेतनभावतः ।
निष्कलुषं सुखकरं मोहकं
सरलशिशो ! ते क्रीडनम् ॥ ॥ रम्यं रम्यं० ॥

छलहीनं ते स्वान्तमलिप्तं
सकलजागतिकदूषणैः ।
सरलं विमलं विकृतिविरहितं
हिमशुचि सलिलसुपावनम् ॥ ॥ रम्यं रम्यं० ॥

न तु केनापि विरोधो वैरं
मात्सर्यं न च दौर्हृदम् ।
चिन्ता दुःखं व्यथा मानसी
कौटिल्यं न कुवर्तनम् ॥ ॥ रम्यं रम्यं० ॥

विकसितलघुदन्तावलिहृद्यं
हरति मनस्ते सुस्मितम् ।
अश्रुस्रवणं सहठरोषणं
चापि रोचते रोदनम् ॥ ॥ रम्यं रम्यं० ॥

भुवि लुण्ठनमनुधावनमधिकं
रञ्जकमाननरञ्जनम् ।
दोलादोलनमादौ सुखदं
तदनु क्रोडारोहणम् ॥ ॥ रम्यं रम्यं० ॥

अनुकरणं ते मधुरा लीला
हठकरणं स्वाभाविकम् ।
अङ्गे ह्यङ्गे स्फुरति चापलं
ताले ताले नर्तनम् ॥ ॥ रम्यं रम्यं० ॥

अस्फुटमधुरगिरा मधुरसनम्
अलकैर्मधुकरमालिकाम् ।
हासैर्धरसि च सुमनोजालं
रूपं ते जनमोहनम् ॥ ॥ रम्यं रम्यं० ॥

शैशव रे ! पुनरागमनं ते
घटते चेन्मम प्राङ्गणे ।
सरसं सरसं भवतु जीवनं
दूरं गच्छतु दूषणम् ॥ ॥ रम्यं रम्यं० ॥

प्रणयकाकली

अयि सुबाले ! प्रणयरागमाले ! प्रिये !
त्वं मनोमन्दिरं मे प्रविष्टा कथम् ।

प्रेमकान्तारचारिन् ! हृदयवल्लभ !
त्वां समालोक्य जातं नु मे किं न किम् ॥

चित्तमासीन्नितान्तं प्रशान्तं मे
आगता त्वं न जाने कुतः सुन्दरि !
लोलदृग्भ्यः सुतीक्ष्णाः शरा निर्गता-
स्ते कटाक्षैः कृतं मे हृदयवेधनम् ॥ ॥ अयि सुबाले० ॥

रे समुत्तीर्य कैशोर्यवीथीमहं
यौवनारम्भमार्गेऽचलञ्चाग्रतः ।
पूर्वमासीः स्थितस्त्वं प्रणयप्राङ्गणे
भावबीजाङ्कुरो जन्म लेभे स्वयम् ॥ ॥ प्रेमकान्तार० ॥

स्नापिता त्वं नु लावण्यराशौ चिरं
चन्द्रिकाधौतरूपा तनुस्तेऽथवा ।
नव्यनवनीतनीतं मृदुत्वं त्वयि
दुग्धगौरी छविर्मोहनं ते परम् ॥ ॥ अयि सुबाले० ॥

किञ्चिदस्ति स्वभावे तवान्तर्बहि-
र्येन मुग्धं मनो मे बलादाहृतम् ।
स्फूर्तिरङ्गेषु दीप्तिः शरीरे परा
सर्वतस्त्वां सुहृन् नववयोनर्तनम् ॥ ॥ प्रेमकान्तार० ॥

रागरङ्गेन यद् रञ्जितं मानसं
दृश्यते ते कपोले तदुद्वेलनम् ।
लक्ष्यते तेऽधिकं गूढसंवेदनं
चेष्टसे त्वं यथा भावसंगोपनम् ॥ ॥ अयि सुबाले०

बहुविधैर्मधुमयैः स्वैर्वचोजालकै-
र्यद् व्यनक्षि त्वलीकं तदाडम्बरः ।
त्वादृशानां नु कः प्रत्ययः कामिनां
शीलमेषां हि हृत्कन्दुकक्षेपणम् ॥ ॥ प्रेमकान्तार०

रत्नरूपा सुकन्याजनानामहो
पुष्पमाला सुगन्धा वने जीवने ।
मेघमालेव मे हृन्मरौ वर्षिता
इन्दुलेखेव मे ह्लादिनी त्वं परम् ॥ ॥ अयि सुबाले० ॥

यद्यहं सद्गुणैरीदृशैः शालिनी
देहि वासं स्थिरं स्वे हृदयमन्दिरे ।
त्वं मदीयस्त्वदीयाहमेका सखे !
प्रीतिवल्ली रसाला फलेत् सन्ततम् ॥ ॥ प्रेमकान्तार०

एहि लज्जामतिक्रम्य मे त्वन्तिकम्
मेलने नौ प्रगाढो रसो वर्धताम् ।
प्रेमपदवी खरैः कण्टकैरञ्चिता
विघ्नबाधाशतं चासिधाराव्रतम् ॥ ॥ अयि सुबाले०

आगता कुतस्त्वम्

हिमभूतं मम मनो नु जडताग्रस्तं सुप्तम्
अयि वसन्तललने ललिते ! आगता कुतस्त्वम् ?

निष्पन्दं नीरवं सदासीन्मम प्राङ्गणं
अयि प्रावृड्घनमाले ! विस्तारिता कुतस्त्वम् ?

सोढं तपनं द्रवितं चित्तं
चाश्रुसमूहैः रुदितं तेन ।
अन्तर्मुकुलं दग्धीभूतं
कृतसेचनमपि नयनजलेन ।।

स्विन्नं मे मानसं क्षालितुं
जलकणिके ! पातिता कुतस्त्वम् ?
।। अयि प्रावृड्घनमाले० ।।

कम्पयमानो मे रोमालिम्
अवहद् वायुरियद्धिमशीतः ।
धवलहिमैश्छादितो मदीयो
विषमाधिर्वेदनापरीतः ।।

दले दले ह्युन्मीलनकारिणि
पवनसुतनु ! लालिता कुतस्त्वम् ?
।। अयि वसन्तललने० ।।

चमत्कृत्य चाल्पं चपलावत्
किं यास्यति विलयं नवबाला ।
सदा तिमिरसहचारकारिणी
भवसि न किं त्वं तारकमाला ॥

एकस्फुरणेनैव सुदामिनि !
नभसान्तर्धारिता कुतस्त्वम् ?
॥ अयि प्रावृड्घनमाले० ॥

धवलविमलहासं वितरन्ती
सितवसने ! किं पथि मे याता ।
निश्चलहृदयोदधिः कम्पितो
भावतरङ्गैश्चलता जाता ॥

भ्रमचक्रेऽस्मिन् शरच्चन्द्रिके !
प्रणयस्मृतिं प्रापिता कुतस्त्वम् ?
॥ अयि वसन्तललने० ॥

स्वश्रीसम्मोहने निबद्धं
प्रकृतिदेवि ! मुग्धं मम हृदयम् ।
आतपमपि रसमयं कुरु त्वं
धावनमस्तु न तृषितैः सरयम् ॥

अपि विजने स्पन्दनमानेतुं
पिकमाले ! चालिता कुतस्त्वम् ?
॥ अयि प्रावृड्घनमाले ! ० ॥
॥ अयि वसन्तललने ! ० ॥

वर्षति पानीये

रिमझिमझिम् वर्षति घनमाला
घनपयसा स्विन्ना नवबाला
पूरोत्प्लवनमहो समन्ततः
सरित्सरोनदपानीये ।
चल ललने! मज्जावः ससुखं
यथा सुमीनौ पानीये ॥

छपछपरवशीर्बिन्दुनिपातः ।
बिन्दुविमिश्रितशीतलवातः ॥
को मानी मानसे न विचलति
द्रवति न मुह्यति पानीये । ॥ चल ललने० ॥

छियोछियोध्वनियुतमुखभागः ।
रटितपटप्रक्षालनरागः ॥
रजकीरजकसमूहस्तिष्ठति
पल्वलमध्ये पानीये । ॥ चल ललने० ॥

धृतहलवृषभयुगलमनुयातम् ।
त्वरितं ग्रामाटिकानिर्यातम् ॥
नवकृषीवलद्वन्द्वं क्षेत्रं
कर्षति वर्षति पानीये । ॥ चल ललने० ॥

नभसि नभसि मासे घनखेला ।
ग्रामे ग्रामे दोलनवेला ॥
आवामपि रतिकेलिविलासैः
सह विहरावः पानीये । ॥ चल ललने० ॥

सुचिरं रुचिरं नृत्यति केकी ।
रटति किमपि जललीना भेकी ॥
अरुणाभा मृदुलेन्द्रगोपिका
दृश्यन्तेऽस्मिन् पानीये । ॥ चल ललने० ॥

हृष्यति तुष्यति गोपो गाने ।
महिषगणोऽयं लुठति निपाने ॥
मुदमुपयाताः स्नाताः सर्वे
खगपशवो नवपानीये । ॥ चल ललने० ॥

पश्य कदम्बकदम्बललामम् ।
परिणतजम्बूफलमाश्यामम् ॥
तरुलताभिरपि धत्तं धौतं
नवपरिधानं पानीये । ॥ चल ललने० ॥

नवधवलां तव कुन्तलगलिताम् ।
जलदसलिलकणिकावलिललिताम् ॥
शुचिमौक्तिकशङ्कया मयूरः
पश्य जिघत्सति पानीये । ॥ चल ललने० ॥

दर्शितबहुविधरिङ्गणभङ्गः ।
स्निग्धजनं मोहयति तरङ्गः ॥
धनुरादाय विविधवर्णं को
नौ नु जिगीषति पानीये । ॥ चल ललने० ॥

दिशि दिशि दर्शितविलसितसकला ।
क्रीडति जलदक्रोडे चपला ॥
मोदं वहति च तामालिङ्गति
सरसपयोदः पानीये । ॥ चल ललने० ॥

घनमेघैर्मेचकितं गगनम् ।
रतिरसकारि सकलवनभवनम् ॥
नीडं याति पतङ्गो, जलधेः
पतति पतङ्गः पानीये ।
चल ललने मज्जावः ससुखं
यथा सुमीनौ पानीये ॥

कालनिशा दिनकाले

किमियं कालनिशा दिनकाले ?
पुरमेतद् बद्धीकृतमद्य तु कर्कशकरफ्यूजाले ।

जनहीनाः शून्याः पन्थानः ।
आवुक्कन्ति दिशि दिशि श्वानः ॥
प्रलयजलोत्प्लावनमिव जातं सागरनगरविशाले । ॥ किमियं० ॥

न हि विपणिर्न च विक्रेतारः ।
सर्वत्र श्मशानविस्तारः ॥
लुण्ठितमिव सकलं लुण्टाकैरत्र गते भूपाले । ॥ किमियं० ॥

नौषधमिति म्रियमाणो रोगी ।
रोदिति शिशुरपि दुग्धवियोगी ॥
कः क्षमते जीवितुं जनः फूत्कुर्वति द्वेषव्याले । ॥ किमियं० ॥

विद्धः सुत इति विलपति माता ।
क्रन्दति कापि हतो मे भ्राता ॥
पितरौ भ्रमतो विद्यालयतो गृहं नागते बाले । ॥ किमियं० ॥

जनो जनस्य जीवनद्वेषी ।
हन्ति मित्रमपि हा प्रतिवेशी ॥
छिन्धि भिन्धि काटय मारय, इति वितते चीत्कृतिजाले ॥ किमियं० ॥

नरशोणिततृषिता दुर्दान्ताः ।
पथिषु चरन्त्यगणिताः कृतान्ताः ॥
पातयन्ति भुवि देहसमूहं चलति कठिनकरवाले । ॥ किमियं० ॥

क्वापि छुरिकाकृतसंहारः ।
बमे चालिते हाहाकारः ॥
यष्टि-भुशुण्डि-शर्वला-पिस्तल-बहुगुलिकायुधमाले । ॥ किमियं० ॥

श्रमजीवी जीविकाविहीनः ।
विविधाभावैर्व्यथितो दीनः ॥
चौरवृत्तिमवलम्ब्य वाणिजैरर्जितमधिकमकाले । ॥ किमियं० ॥

कृत्वा धर्मजातिमदपानम् ।
अन्धस्त्यजति शुभाशुभभानम् ॥
बन्दीगृहमपि यान्ति जनाः कृतदण्डे नगरश्याले । ॥ किमियं० ॥

हिन्दु-यवन-खिष्टिय-सञ्जाताः ।
विधिसृष्टौ तु समे समजाताः ॥
कुतो जन्मभेदे नु भेदनं जनितं बन्धुसुमाले । ॥ किमियं० ॥

विग्रहे तु दुःखं शुग्ग्लानिः ।
ज्ञान-मान - धन - जीवनहानिः ॥
न हि लाभः कस्यापि कश्चिदपि प्रचलति युधि विकराले ॥ किमियं० ॥

स्नेहसुधा हि सकलसुखसारः ।
ध्वंसकरो विषवृक्षविसारः ॥
रक्तविलिप्तः पङ्ककलङ्कोऽयं भारतभूमाले । ॥ किमियं० ॥

विद्यामन्दिरदूषणम्

किं किं न भवति न हि किं घटते ।
हा देवि सरस्वति ! भवने ते ।
किं किं न च परिवर्तितमधुना
वीणावादिनि ! शुचिभवने ते ॥

न तु विद्या पूर्ववदनवद्या ।
न च शिक्षा शान्तिकरी हृद्या ॥

सकला दूषितकुत्सितमार्गाः
प्रचलन्ति शुभे ! शुभभवने ते । ॥ किं किं न० ॥

नोत्कर्षो गुरुषु न रे गरिमा ।
शिष्येषु न शीलविनयमहिमा ॥

गुरुशिष्यसुभावलता ह्यनिशं
हा हन्त ! प्रशुष्यति भवने ते । ॥ किं किं न० ॥

शिक्षा सञ्जाता व्यापारः ।
द्रव्यार्जनहेतुसुखाधारः ॥

धनलिप्सूनामुद्योगगृहाः
प्रचलन्ति सुखं शुचिभवने ते । ॥ किं किं न० ॥

लक्षाधिपशोषणदक्षनराः ।
शिक्षालयचालनकर्मपराः ॥

धनमत्त-निरक्षर-मूढजनैः
स्वामित्वमकारि सुभवने ते। ॥ किं किं न० ॥

आन्दोलनमनशनमग्नियुतम्।
त्रोटन-हिंसा-स्फोटनमनिशम् ॥

उग्रत्वमुपद्रव एव सदा
न हि शान्तिरिदानीं भवने ते। ॥ किं किं न० ॥

शिक्षणमवरुध्यति बहुकालम्।
नो छात्रगणाः, कलकलजालम् ॥

धृतदण्डा राजपुरुषवर्गाः
प्रविशन्ति वसन्ति सुभवने ते। ॥ किं किं न० ॥

प्रसृतोऽत्र दुरित-दुर्नय-रोगः।
छल बल-सन्दूषण-संयोगः ॥

अतिकुत्सितराजनीतिपङ्कः
प्रसरति परितोऽमलभवने ते। ॥ किं किं न० ॥

कक्षासु न तद् गहनज्ञानम्।
पठने न पाठने तद् ध्यानम् ॥

छात्रस्य परीक्षोत्तरणमेव
जीवनपरलक्ष्यं भवने ते। ॥ किं किं न० ॥

विषमा हि परीक्षादुष्टप्रथाः।
दारुणभयदुःखकरालकथाः ॥

अनुकरणं हननं भयकरणं
च चलन्ति परीक्षाभवने ते। ॥ किं किं न० ॥

मादकवटिकामदिराव्यसनम् ।
कलुषं द्यूतादिकदुर्व्यसनम् ॥

अङ्गीकृतमयि सहचररूपे
सुकुमारसुतैर्निजभवने ते । ॥ किं किं न० ॥

अग्रजैर्नवागतमानं रे ।
अतिदर्पणकष्टप्रदानं रे ॥

छात्रालयप्रविविक्तुर्बालः
पीडामनुभवति तु भवने ते । ॥ किं किं न० ॥

अनुदिनमनुशासनहीनत्वम् ।
गुरुजनपरवशतादीनत्वम् ॥

यष्टि-सुमुष्टिभिरायुधनिकरै-
र्दलयोधनमद्य तु भवने ते । ॥ किं किं न० ॥

अतिपक्षपातपातकपतनम् ।
बहु वर्धितमयि गुरुजनकरणम् ॥

कुविचारगणो ह्यसदाचारो
दुर्वृत्तप्रचारो भवने ते । ॥ किं किं न० ॥

जातः सर्वो रूप्यकदासः ।
सेवासु च ते न समभिलाषः ॥

तव एव तिरस्कृतिरुपहासो
ह्यधरीकरणं निजभवने ते ।
॥ किं किं न भवति० ॥

खेलनम्

खेलनं खेलनं, सुन्दरं खेलनम्
अद्य सायं भवत्युत्तमं खेलनम्
बालकानां भवत्युत्तमं खेलनम्

सर्वतो बालका बालिका आगताः।
क्रीडनैः संयुताः सहचरैः सङ्गताः॥
तुल्यवयसामिदं रोचकं मेलनम्। ॥ खेलनं० ॥

उच्चदेशात् समुत्प्लुत्य तत् कूर्दनम्।
इतो वेगतो रे ततो धावनम्॥
नव्य उत्साह एतन्नवस्पन्दनम्। ॥ खेलनं० ॥

द्वौ दलौ खेलतः कन्दुकैः सन्ततम्।
हन्ति पादैः क्वचित् कोऽपि हस्तैश्च तम्॥
लौहमयगोलके कन्दुकस्थापनम्। ॥ खेलनं० ॥

एकतः कन्दुकक्षेपणे तत्परः।
यष्टिना हन्ति वेगेन बालोऽपरः॥
सुप्रियं नः क्रिकेटाभिधं क्रीडनम्। ॥ खेलनं० ॥

तत्परोऽन्यस्य चैकोऽक्षिसङ्कोचने।
बालकोऽन्यो निलीनः क्वचिन्निर्जने॥
जयपराजयकरं मार्गणामार्गणम्। ॥ खेलनं० ॥

उच्चदेशात् सरन्तो लभन्ते सुखम् ।
दोलनेषु भ्रमन्तो विशन्तीह खम् ॥
रोचते चेतसे सर्वतो दोलनम् । ॥ खेलनं० ॥

ते तडागे प्लवन्तो रमन्ते परम् ।
तैर्जलोच्छालनैः रे मिथः क्रीडनम् ॥
नूतनोत्साहनद्याः समुद्वेलनम् । ॥ खेलनं० ॥

केऽपि दीव्यन्ति ताशैश्च पाशैः सदा ।
गोटिका-गुल्लिकाभी रमन्ते मुदा ॥
नव्यप्राचीनखेलासुसंयोजनम् । ॥ खेलनं० ॥

कृत्रिमां श्वेतचटकामिमे बालिके ।
हस्तयष्ट्या हतो रोपिते जालके ॥
बैडमिण्टनविलासैर्मनोरञ्जनम् । ॥ खेलनं० ॥

सिन्धुतीरे क्वचिद् बालजालं सुख ।
हन्त निर्माति कौ बालुजालैर्गृहम् ॥
लघुखगानां यथा नीडसंरोपणम् । ॥ खेलनं० ॥

नग्नदेहास्तथा रेणुना रूषिताः ।
शुभ्रवेषा विभूषाशतैर्भूषिताः ॥
ते समानाः समे खेलने सन्ततम् ।
खेलनं खेलनं,
सुन्दरं खेलनम् ॥

वाष्पयानेन यानम्

छुक्-छुक छुक्-छुक गच्छति यानम्
गच्छति यानं, धावति यानम्
चलति सवेगं वाष्पसुयानम्

दिल्लीतो मुम्बईं प्रापिताः कलिकातां कश्मीरम् ।
अद्योषिता आन्ध्रमद्रासे श्वोऽधिपञ्चनदतीरम् ॥
नहि जायते दूरताज्ञानम् ।
॥ छुक्-छुक० ॥

याति सवेगं झञ्झारूपं ह्युच्चैर्विदधद् ध्वानम् ।
शनैः शनैर्धारयति मन्दतां यत्र विश्रमस्थानम् ॥
भवति तत्र चायादिकपानम् ।
॥ छुक्-छुक० ॥

धावन्तो लक्ष्यन्ते तरवो ग्रामगृहादिव्यूहाः ।
विमुखदिशं धावन्तः सततं स्थावरवस्तुसमूहाः ॥
परमविचित्रमिदं प्रतिभानम् ।
॥ छुक्-छुक० ॥

दृश्यन्ते वनदेशाः सरितः परितः पर्वतमालाः ।
विचरन्तो हरिणा गोमहिषा हयहस्तिनो विशालाः ॥
ददति हि यानरवे स्ववधानम् ।
॥ छुक्-छुक० ॥

पथि राजन्त उभयतो ग्रामाः सावगुण्ठना रामाः ।
क्रीडालग्नो बालसमूहो गोगोपा अभिरामाः ॥
सौत्सुक्यं पश्यन्ति नु यानम् ।
॥ छुक्-छुक० ॥

गोधूमानां विततं क्षेत्रं सस्यानां विस्तारः ।
सर्षपपीतवसनभरिता भूः बहुरसालफलभारः ॥
विलसति जलभरितं च निपानम् ।
॥ छुक्-छुक० ॥

क्वचिदपि घनगिरिगह्वरमध्ये तमसि वयं प्रविशामः ।
घोरनिशासु गहनवनजाले सततमनेन चलामः ॥
सङ्कटभरितमनेन प्रयाणम् ।
॥ छुक्-छुक० ॥

बहुभाषाभाषिणो यात्रिणो विविधजातिवर्गीयाः ।
विदधति वार्ताः कथा मिथस्ते वैदेशिकदेशीयाः ॥
सुखदं तत्र गल्परसपानम् ।
॥ छुक्-छुक० ॥

कोऽपि मनो रञ्जयति पुस्तकैः सरसपत्रिकालीनः ।
पाशैर्दीव्यति कोऽपि सुखालापेषु च परो विलीनः ॥
शृणुते कोऽपि च भिक्षुकगानम् ।
॥ छुक्-छुक० ॥

आरोहन्ति कथञ्चित् केचित् कक्षं काठिन्येन ।
अवरोहन्ति यात्रिणश्चान्ये सहिता बहुभारेण ॥
भारवाहकैर्भरितं स्थानम् ।
॥ छुक्-छुक० ॥

गर्जद् घोररवेणोच्चैर्बहु धूममुद्गिरन्म्लानम् ।
कालरूपमायाति सवेगं कालायसमययानम् ॥
कालाञ्जनमग्रे च दधानम् ।
॥ छुक्-छुक० ॥

देशे देशे कोणे कोणे चलतीदं गतिशीलम् ।
प्रतिभागं मेलयति परेणाटत् सर्वत्र सलीलम् ॥
गतमौन्नत्यमियद् विज्ञानम् ।
छुक्-छुक छुक्-छुक गच्छति यानम् ॥

मा कुरु मदमयि सुमनोमाले !
नव्यकण्ठमादाय रे ।
स्खलनं न हि शोभते तवैतत्
परिवर्तनमाधाय रे ॥ ॥ क्व नु याता० ॥

किं न चलसि प्रियपथमभि ललने !
चलने रुचिं विधेहि रे ।
प्रणयस्मृतिः शून्या पादैस्ते
सविलासं पुनरेहि रे ॥ ॥ क्व नु याता० ॥

किमतीता क्षणदायिनि मधुरे !
वीतक्षण इव मे नु रे ।
नैष्यसि चेद् भाविनि काले त्वं
कथमिदमहं सहे नु रे ॥ ॥ क्व नु याता० ॥

नवरससुधया सिञ्च मनो मे
मां नैराश्यात् पाहि रे ।
सकृदप्यानय तत् तद् वीतं
सुभगे ! पुनरायाहि रे ॥ ॥ क्व नु याता० ॥

क्व नु याता रसमयि घनमाले ॥

विषमविडम्बनम्

जीवनवने बहुकण्टकैः
वयमर्दिता नु पदे पदे ।
विषमैरसङ्ख्यविडम्बनैः
वयमाधृता नु पदे पदे ॥

अमृते भृशं धृतलालसः
अचरं चिरञ्च समन्ततः ।
परमधिगतं क्षुपिपासुना
विषमेव हैमघटे घटे ॥ ॥ जीवनवने० ॥

नैके विमलसलिलाशयाः
सरितो वहन्तु महीतले ।
न त्रिपथगाया मधुरता
रसिता कदापि जले जले ॥ ॥ जीवनवने० ॥

मृदुमसृणमूर्तिभिरर्जिता
पाषाणमयता कुत उत ।
निर्दयतया दलितं मनः
छलितं सुखेन दिने दिने ॥ ॥ जीवनवने० ॥

जलभृतेऽस्मिन् ग्रामकूपे
मदिरा नु केन निपातिता ।
मदकारिणी विषसमरुजा
प्रसृता जनेषु गृहे गृहे ॥ ॥ जीवनवने० ॥

सुचरित्रताया मार्गणे
संधावितोऽहमहर्निशम् ।
मृगमदसमा शुचिहृदयता
परमधिगता न जने जने ॥ ॥ जीवनवने० ॥

सैन्यं विनापि विरोधिनां
संदृश्यते हठसङ्गरः ।
गलकृन्तनाय परस्परं
विविधायुधा हि करे करे ॥ ॥ जीवनवने० ॥

जीवति मरिष्यति श्वोऽद्य वा
कश्चलति चक्रे कालिके ।
हा रण-विदारण-मारणं
परिदृश्यते तु पणे पणे ॥ ॥ जीवनवने० ॥

कः किं प्रयच्छेत् सम्बलं
सर्वेऽत्र कुण्ठितलुण्ठिताः ।
गहना निराशा विवशता
उषिता भुवीह कणे कणे ॥

॥ जीवनवने बहुकण्टकैः० ॥
॥ विषमैरसङ्ख्यविडम्बनैः० ॥

विपरिणमनम्

दृष्टं पुष्पं विहसितवदनं विकसितमद्योद्याने
क्व नु लुप्तीभूतं न हि जाने ।

वर्धितपोषितमतियत्नेन ।
सिक्तमनारतममृतजलेन ॥
मालाकारो रोदिति लुप्ते सौरभरूपनिधाने । ॥ क्व नु० ॥

नवकलिका परिपक्वफलं वा ।
स्फुटपाटलमुत मृदुकमलं वा ॥
कृन्तति सकलं कालकरालः सुधृते करे कृपाणे । ॥ क्व नु० ॥

हतमेकं शीतातपघातैः ।
अपरं वातोल्काहिमपातैः ॥
पातितमेकैकं भुवि कुसुमं सति म्लाने वाऽम्लाने । ॥ क्व नु० ॥

कस्याप्यत्र प्रथममधुमासः ।
अतिनव्यो मधुमधुरविलासः ॥
को जीवति काले समागते कृतविषशरसन्धाने । ॥ क्व नु० ॥

आयातो नागो मदमत्तः ।
येन द्रुतसम्भ्रमः प्रवृत्तः ॥
उत्क्षिप्ता मर्दिता लताली पादे बद्ध्वोत्ताने । ॥ क्व नु०


इह न हि किमपि स्ववशीभूतम् ।
जीवितमपि विपरीतं धृतम् ॥
केन कृतं साहसमतिघोरं शान्तेऽस्मिन् सुविधाने । ॥ क्व नु० ॥

यत्र सुखकरं नर्तनगानम् ।
भवति सपदि शून्यं तत् स्थानम् ॥
प्रसरति जनचीत्काररोदनं तूर्यवादनस्थाने । ॥ क्व नु० ॥

तव जानीमोऽभिनवपरागम् ।
अलिजनपरिवेष्टनमतिरागम् ॥
सुमनोमाले ! किं किं द्रक्ष्यसि निजतारुण्यप्रयाणे । ॥ क्व नु० ॥

स्मरणीयस्ते सुरभिविसारः ।
प्रसृतो बहु रूपश्रीसारः ॥
शून्यं नोपवनं कदाचिदपि भाविनि सति सन्ताने । ॥ क्व नु० ॥

स्फुटति बीजतो नवकन्दलिका ।
वृद्धिमेति खलु लतिकोत्कलिका ॥
एकोद्भवति परा परिणमते प्रारम्भे ह्यवसाने । ॥ क्व नु० ॥



INDIAN OFFSET PRINTERS